# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – नवम्बर-दिसम्बर, २०१६

| | | |
|---|---|---|
| कक्षा – शास्त्रिप्रथमवर्षम् (SEM-1) | **प्रश्नपत्रम् – ६** | गुणाः - ७० |
| विषयः – नव्यन्यायः | **कोड – C.C.1.1.2** | समयः – ०३ तः ०६ पर्यन्तम् |
| दिनाङ्कः – १०/१२/२०१६ | सन्दर्भग्रन्थः – न्यायसिद्धान्तमुक्तावली | |

---

विभागः-१

प्रश्नः-१ निम्नेषु द्वयोः व्याख्या विशदतया लेख्या । (०८)

(१) सिद्धान्तव्याप्तिं स्पष्टं प्रतिपादयत।

(२) पक्षतां व्याख्यात।

(३) अनुमानस्वरूपं विवेचयत।

प्रश्नः-२ द्वयोरेकस्य विस्तृतव्याख्या देया। (०८)

(१) पञ्चहेत्वाभासान् कारिकाभिः विवेचयत।"व्याप्तिः

(२) साध्यवदन्यस्मिन्नसम्बन्ध उदाहृतः"स्पष्टं विवृणुत।

प्रश्नः-३ द्वयोः टिप्पणीं दत्त। (०४)

(१) असिद्धः।

(२) प्रतियोग्यनधिकरणत्वम्।

(३) सिषाधयिषा।

प्रश्नः-४ पञ्चानाम् उत्तराणि एकैकवाक्येन लिखत। (०५)

(१) ऐकाधिकरण्यमित्युक्ते किम्?

(२) सत्प्रतिपक्षस्य लक्षणं किम्?

(३) का पक्षता?

(४) व्याप्तिः कतिविधा?

(५) व्यतिरेकव्याप्तेः लक्षणं किम्?

(६) बाधलक्षणं किम्?

(७) परामर्शः कः?

विभागः-२

प्रश्नः-५ द्वयोः व्याख्यां विशदतया लिखत । (०८)

(१) हेत्वाभाससामान्यलक्षणदलसार्थक्यं विवृणुत।

(२) जातिविशिष्टव्यक्तौ शक्तिरिति न्यायमतं प्रतिपादयत।

(३) उपमानशब्दप्रमाणे प्रतिपादयत।

प्रश्नः-६ द्वयोरेकस्य विस्तृतव्याख्या देया। (०८)

(१) शाब्दबोधप्रक्रियां स्पष्टं विवेचयत।

(२) उपमानप्रमाणस्य प्रमाणान्तरत्वेन स्वीकारे युक्तिं प्रतिपादयत।

प्रश्नः-७ द्वयोः पूर्तिः कार्या। (०४)

(१) "व्याप्यस्य------------उदाहृतः"॥

(२) आद्यः साधा----------------भवेत्॥

(३) "अनैकान्तो------------पञ्चधा"॥

प्रश्नः-८ पञ्चानाम् उत्तराणि एकैकवाक्येन लिखत। (०५)

(१) आश्रयासिद्धिः का?

(२) असाधारणः कः?

(३) किं नाम पदम्?

(४) योगरूढस्य लक्षणं किम्?

(५) लक्षणा का?

(६) मुक्तावल्याः कर्ता कः?

(७) का नाम वृत्तिः?

विभागः-३

प्रश्नः-९ द्वयोः व्याख्या विशदतया ददातु। (०८)

(१) "एकसम्बन्धिज्ञानम् अपरसम्बन्धिस्मारकम्" इति नियमं सप्रसङ्गं व्याख्यात।

(२) 'वाक्यस्यशेषाद्विवृतेर्वदन्ती'ति कारिकां व्याख्यात।

(३) राजपुरुषेत्यत्र शाब्दबोधप्रकारस्वरूपं व्याख्यात।

प्रश्नः-१० द्वयोरेकस्य विस्तृतव्याख्या देया। (०८)

(१) "लक्षणाशक्यसम्बन्धस्तात्पर्यानुपपत्तितः" स्पष्टं व्याख्यात।

(२) पदचातुर्विध्यं प्रतिपादयत।

प्रश्नः-११ द्वयोः समीचीनोत्तराणि दत्त। (०२)

(१) तात्पर्यं किम्?

(२) का नाम आसत्तिः?

(३) का नाम योग्यता?

(४) पदं कतिविधम्?

प्रश्नः-१२ द्वयोः समीचीनोत्तराणि लिखत। (०२)

(१) यः साध्यवति नैवास्ति सः कः?

(२) जातावेव शक्तिर्नतु व्यक्तौ कुतः?

(३) किं नाम सादृश्यम्?

(४) उपमितौ व्यापारः कः?

★★★

समाधानानि

कक्षा – शास्त्रिप्रथमवर्षम् (SEM-1) **प्रश्नपत्रम् – ६** गुणाः - ७०

विषयः – नव्यन्यायः **कोड – C.C.1.1.2** समयः – ०३ तः ०६ पर्यन्तम्

दिनाङ्कः – १०/१२/२०१६ सन्दर्भग्रन्थः – न्यायसिद्धान्तमुक्तावली

प्रश्नः - ४

१. सामानाधिकरण्यम्।
२. साध्याभावव्याप्यवान्पक्षः।
३. सिषाधयिषाविरहविशिष्टसिद्ध्यभावः पक्षता।
४. द्विविधा। अन्वयव्याप्तिः, व्यतिरेकव्याप्तिश्च।
५. तदभावे तदभावः।
६. साध्याभाववान् पक्षः बाधः।
७. व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः।

प्रश्नः - ८

१. पक्षासिद्धिः।
२. सर्वसपक्षविपक्षव्यावृत्तः हेतुः।
३. शक्तं पदम्।
४. अवयवशक्तिविषये समुदायशक्तिरप्यस्ति तद्योगरूढम्।
५. शक्यसम्बन्धो लक्षणा।
६. विश्वनाथपञ्चाननभट्टाचार्यः।
७. शक्तिलक्षणान्यतरसम्बन्धः वृत्तिः।

प्रश्नः - ११

१. वक्तुरिच्छा तु तात्पर्यम्।
२. अन्वयप्रतियोग्यनुयोगिपदयोरव्यवधानम्।
३. पदार्थे तत्र तद्वत्ता योग्यता।
४. चतुर्विधम्।

प्रश्नः - १२

१. विरुद्धः।
२. व्यभिचारादानन्त्याच्च।
३. तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्।
४. वाक्यार्थस्मरणम्।